देवतां विदुषो उत्क्रान्तिरस्त्येव मार्गस्तु लयः स्मर्ति श्रुतमन्त्रोः शुकस्यादित्यमंडलं प्रस्थानं द

र्शयतीति प्राप्ते। एवं प्राप्ते ब्रूमः स्पष्टो ह्येकेषां नाद्य देहापादानस्य तथा ह्यार्तभागप्र

श्नोत्तरे एकस्मिन्पक्षे संसारिण एव जीवात्मनोत्क्रान्तिपरिग्रहेण तर्हीयं मृतः प्राणाना

मनुत्क्रान्तेरिति स्वयमाशंक्य प्राणानां प्रविलयं प्रतिज्ञायन्त्वसिद्ध्यर्थमुत्क्रान्त्यवधेस्तद्रूपना राम

म्नानेवुवनः स्याक्षयना म्नानेतस्य तदंघित्वमाह। शारीरस्य चेतेऽइति शारीरमेव लक्षणा

४ गति देहापादानस्य

नगम्यते। नन्वेवमप्यस्त्वविदुषो: संसारिणोविदुषस्तु किमायातं निमित्तमत आह। तस्मा मान्या
दिति। ननु तदा सर्वनाम्ना प्रधानतया देही परामृष्टः तत्कथमत्र देहाच्च गतिरित्यत आह। अभे
दोपचारेणादेहदेहिनोर्देहिपरामर्शिना सर्वनाम्ना देहएव परामृष्टइति पंचमीपाठे व्याख्येयं
षष्ठीपाठे तु नोपचार इत्याह यद्वा तत्र षष्ठीति। अपि च प्राप्तिपूर्वः प्रतिषेधो भवतीति न प्राप्ते। अवि
दुषो हि देहादुत्क्रमणं हष्टेः ...ति नविदुषोपि तस्मा मान्या देहादुत्क्रमणप्राप्ते प्रतिषिध्यते। न तु
प्राणानां जीवावच्छिन्न चिदुत्क्रमणं दृष्टं येन तन्निषिध्येत अपि चाद्वैतपरिभावनायां वा प्रसंख्या
नेन निर्मृष्टनिखिलप्रपंचज्ञानवर्त्मा सजातस्य तत्त्वाभावादेव नास्ति गतिरित्याह न च ब्रह्मविद
इति। अपरस्य हि विदुषो विदोमार्गोपदेशविरोधो देवा इति योजना चोदयति। ननु गतिरपीति: परिह
रति ... स्मरणस्यैवार्थवादो गवेनेति। अपरविद्याविषयैवेति। तानिपरेतथाह्याह। प्रतिष्ठाप्र
विलयन्नश्रुतोयं विप्रतिपत्तेर्विमर्शः। तमपनेतुमयमारंभः। तानि पुनः प्राणप्रादीदिनांतिप

५५

रिन्द्रियाण्येकादश सूक्ष्माणि च भूतानि पंचैव ब्रह्मविदस्तस्मिन्नेव परस्मिंल्लीनानीति आरंभवी
जं विमर्शमाह। ननु गताः कला इति प्राणामनन्तरोक्तप्रत्यस्तमितं विवक्षिता पंचदशत्वमुक्तं।
अत्र श्रुत्योर्विषयव्यवस्थया विप्रतिपत्त्यभावमाह। सापेक्षेति। व्यवहारो लौकिकः सांव्यव
हारिकप्रमाणापेक्षो यस्तु तिरोहितस्तात्त्विकप्रमाणापेक्षस्तादृक्त्वेवमेवास्य परिद्रष्टुरित्यादिका वि २
द्वत्प्रतिपत्त्यपेक्षा तात्त्विकप्रमाणापेक्षा [illegible] तस्माद्विषयभेदादविप्रतिपत्तिः
श्रुत्योरिति॥ अविभागो वचनात्। यद्यपि निमित्तापाये नैमित्तिकस्यापायस्तथापि कोऽपायोऽविद्यानि
मित्तस्य विभागो नाविद्यायां विद्यायाः समूलघातमाहतायां सावशेषो भवितुमर्हतीति। तथा
पि प्रलयसामान्यात्स्यादेव शंकेत्यतस्तां कामतिमन्दामपनेतुमिदं सूत्रं। तदोकोऽग्रज्वलनं तत्प्रकाशि
तद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया॥ अपरविद्या
विदोऽविदुषश्चोत्क्रान्तिरुक्ता तत्र किं विद्वानविदुषश्चाविशेषेणामूर्द्धादिभ्य उत्क्रामत्याहो राम

हार्दविद्यासामर्थ्यादुत्क्रमस्थान ४

विद्वान् मूर्द्धस्थानादेव अपरे तु स्थानांतरेभ्य इति। तत्र विद्यासामर्थ्यान्मपक्षप्रतः एवं पक्षः तस्याय

संहृतवागादिकलापस्याच्छिद्र निषेतो विद्वान्नात्मन ओक आयतनं हृदयं। तस्याग्रं। तस्य ज्वल

नं यत् तत्प्रकाशितद्वारेण निष्क्रमणद्वारे विद्वान् मूर्द्धस्थानादेव निष्क्रामति नान्ये। प्यः कुतो वि

द्यासामर्थ्यात्। हार्दविद्यासामर्थ्यादुत्क्रमस्थानादेव निष्क्रामति नान्येभ्यः स्थानांतरेभ्यस्तेन

मः कुतो विद्यासामर्थ्यात् प्रतिलंभाय हि हार्दविद्योपदेशः मूर्द्धस्थानादितिक्रमरोच नौत्क्रम

देशप्राप्तिः अय स्थानांतरेभ्य उत्क्रमनं कस्मात् लोकमुत्क्रमेन प्राप्नोतीत्यत आह। तच्छेषगत्य

स्मृतियोगाच्च हार्दविद्याशेषभूता हि मूर्द्धस्थानाडीगत्यैव उपविष्टा। तदनुशीलनेन स्वस्य

योजी माला हार्दं तस्योपासितेन ब्रह्मणानुगृहीतः तस्यान्स्मरन् तद्भावमापन्नो मूर्द्धन्य

यैव शताधिकया नाड्या निष्क्रामति। इत्याद्युक्तं हि ब्रह्मनाडीभासूरितं मूर्द्धानं विद्वान् मूर्द्धानं

भित्वा सूर्यं ज्ञानमेस्य रश्मिभिरेकीभूत्वा आदित्यमंडलमनुशीलयतः तयैवान्तकाले मिर्गो मनेम

वतीति॥ ॥रश्म्यनुसारी॥ ॥एवं च अहनि चाविशेषेण रश्म्यनुसारी सन्नादित्यमंडलं प्राप्नोती

७ निष्क्रांत[redacted]मिपद्यते इति चेन्न। अत्र पूर्वपक्षमांशं कृत्वा सूत्रावयवेन। निष्क्रा-
न्तीति चेत्। सूत्रावयवान्तरेण निराकरोति न संबंधस्य यावद्देहभावित्वा[redacted]द्दर्शयति च। याव-
द्देहभावो हि शिराकिरणसंपर्कः घर्मार्णां तरात् प्रतीयते दर्शयति चेतमर्थं श्रुतिरप्यविशेषे-
ण अमुष्मादादित्यात् प्रतायंते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायंते
विसृतीयं श्रुति[redacted]ते तेरस्माये ऽमुष्मिन्नादित्ये सृप्ताः प्रतापादि कार्यदर्शनादि-
ति। आदित्यहर्गेन चंद्रातपः संगच्छते चंद्रमसा खल्वमपये न संबध्यमानानां सौरीणां भा-
सां चंद्रिकात्वं। तस्मात् रश्म्यनिनिमित्तो रश्मिप्रचार इति ये त्वाहुः स यद्यप्लुतेः सिपेऽमन स्वाव
दादित्यं गच्छेदिति निरपेक्षमवरागाद्रात्रौ प्रयतो नास्ति रश्म्यपेक्षेति। तान्प्रत्याह यदि च रात्रौ प्र-
श्री तउति। नद्येतर्हि व्याघीयते ऽध्येतारः। येतन्मन्यते विद्वान पि रात्रि प्रायमापराधे तनोर्द्ध्वमा
क्रमत इति। तान्प्रत्याह। अथ विद्वानपीति निर्व्यंफत्सं संबंधेन विहितादिद्यानपाक्षिक राम
तलायुक्ते निश्चितरात्रौ प्रेतस्याविदुषो ऽत्तरायेहां सूर्यमंडलप्राप्तिमावक्तेतेतन्नातमाशंक्यप।
श्रु

ह। अपि राज्ञामिति। यावत्तावद्रूपबंधेनानपेक्षा गतिः श्रुता। न चापेक्षा। श्राक्यावगमा। उपबंधवि
रोधादिति। अतश्चायनेपि दक्षिणे। अत एव शुक्लेतपरामर्शो इत्याह। अत एवापेक्षानुपपत्तेरि
ना ति। पूर्वपक्षबीजमाह। उत्तरायणमृत्योरिति। अपवादमाह। प्राशस्त्यप्रसिद्धिरिति। अतः पदपरा
मर्शे हेतुबलाद्विदुषो मरणं प्रशस्तं तु उत्तरायणे। विदुषस्तु न यत्राप्यविशेषो विद्यासामर्थ्यादि
ति विदुषोपि च वाच्यस्य उत्तरायणप्रतीक्षणं प्रविद्ध। आचारं चाह पितु यद्यदाचरति श्रेष्ठस्तत्त
देवेतरो जन इति न्यायात्। आपूर्यमाणपक्षादित्याद्या च श्रुतिस्तत्कालविशेषप्रतिपत्त्यर्थास्त्व
भिमानिवाहिके देवताः प्रतिपादयतीति तस्मादविरोधः। सूत्रान्तरावतारणाय चोदयति। न ना
न च यत्र काले त्विति। काल एवात्र प्राधान्येनोपात्तो न त्वातिवाहिका देवतेत्यर्थः। योगिनः प्र
स्मार्ते ति स्मर्यते चैते। स्मार्त्तामुपासनां प्रत्ययं स्मार्तः कालविनियोगः प्रत्यासत्तेः। न त्वसौ श्रौ
त इत्यर्थः। यत्र यदि स्मार्तो कालभेदविधिः श्रुतौ चाग्निर्ज्योतिरित्यादि विधिस्तत्राप्यहानामाति
वाहिकतया विषयव्यवस्थया विरोधाभावः। अथ तत्प्रत्यभिज्ञानं तथापि। यत्र काला

त्वत्रापिकालाभि

२ त्वत्रापिकालाभिधानद्वारेणातिवाहिक्यस्य देवतायुक्तादस्याविरोधएवेति॥ ॥इति
श्रीवाचस्पतिमिश्रविरचिते शारीरकभगवत्पादभाष्यविभागे भामत्यां चतुर्थाध्यायस्य
द्वितीयःपादःसमाप्तः २

अध्यायः ४
पादः २

वाचस्पतिचतुर्थाध्यायतृतीयपादारंभः

श्रीगणेशाय नमः॥ अर्चिरादिना तत्प्रथितेः॥ भिन्नप्रकरणस्थत्वाद्विद्योपासनयोगतः। आनपेक्षामि
थो मार्गास्त्वरातो वर्त्तेरपि। गन्तव्यमेकं नगरं प्रति वक्रेणाध्वना गतिमपेक्ष्य ऋजुना गतिस्त्वराव
तिक्ष्यते। एकमार्गेण किमपरमपेक्ष्यतरस्यात्। अथैतैरेरश्मिभिरित्यवधारणं नोपपद्येत। प
र्यन्तरस्य निवर्त्तनीनी यस्याभावात्तस्मात्परस्परानपेक्षाः। एते पंथान एक ब्रह्मलोकप्राप्त्युपाया द्वि
यववद्विकल्प्येरन्निति प्राप्ते प्रत्युच्यते। एकत्वेपि पथोऽनेकपर्व्वसंभवात् गौरवात्त्लैव नानात्वप्रसक्ति
क्तानप्रसंगात्। एकपर्वा हि पंथा नगरादिकमेकं मतकं प्रापयति। नासामार्गास्तु किमेतेरस्य हर्वोद्रुस
र्यादयो धूमः पर्वाणः संतो धूमेकेन मुख्यंतां। अर्चिरादि यथायथमध्वानमपि भिदं त्विति संदेहे अ
नेदेप्य ध्वनो भागभेदोपपत्तेर्न मार्गितेर्न भागभेदकल्पनोचिता गौरवप्रसंगात्। एकदेशप्रतमिदं
त्वि संदेहे नानात्वं विशेषणविशेष्यभावोपपत्तेर्नानेकध्वकल्पना। अथैतैरेव रश्मिभिरित्येवाव
धारणं नतावदर्थी। तरनिवृत्त्यर्थं तत्माप कैरेव बाकंमात्रैर्विरोधात्। तस्मादन्यानपेक्षात्मस्यावधा
रयतीति वक्तव्यं। न चैकैकं वाकं मप्राप्तमध्वानं प्रापयति तस्य चापेक्ष्यतां प्रापयत्तिर्स्वर्थे वक्ष्यायपय

राम
१

ं।तस्मात्विधिसामर्थ्यप्राप्तमयोगमवछेदमेवकारोनभवतीति।तिपुक्तं।त्वरावचनंचेति।नत्व
त्वेकस्मिन्नेवगतमार्गोपस्थितेप्यमपेतत्त्वरावकल्पते।किंतुगंतव्यभेदादपितदुपपत्तेः।यथाका
श्मीरेभ्योमगधान्गच्छतितित्वरितंमपातिचैत्रंतंप्रेतनापिस्यन्यतः कुतश्चिदिहसमासनेनोपायेनत्वसलो
केद्विनंप्रयातीति।तिसंयांसिवाग्निरादिश्रुतौमार्गपर्वाणीति।अस्यमर्थः।एकत्वात्प्राप्तव्यस्यब्र
ह्मलोकस्याल्पपर्वणामार्गेणगतंतुप्राप्तौसंभवेत्स्यावहुपर्वमार्गोपदेशप्यर्थः प्रसज्येत।तच्चे
तनतयाप्रवृत्तेः।तस्मादुपसंहर्तव्यानामविरोधेनाल्पानांतदुनप्रवेशएवकल्प्यइति। ।।वायुमब्दाद
विशेषविशेषाभ्यां।।स्तुमात्यभाविधाउस्पक्रमंप्रतिनितता।।उर्द्धोक्रमणामातेचश्रुतावायोर्निमित्त
ताप्सवायुमागच्छतितस्मैनतत्रविजिहीतेयथारथचक्रस्यखंतेनसऊर्द्ध आक्रमतइति हिवायुनि
मित्तमूर्द्धाक्रमणंश्रुतौ।ननुनिमित्तमादित्यगमने।सत्याादित्यगमनेक्तौत्पादित्यगमनस्मात्रप्रतीते।
नवतेनेस्यनंतरतश्रुतौध्याकृतमात्रेयासंबंधनितेराकांक्षितमादित्यागमनक्रिययापिसंबंधमर्हति
नवादित्यगमनस्यतेनेतिविनाकाचिदनपपत्तिर्येनान्यसंबंधमप्यनुषज्येत।तत्राग्निलोकमा

कतिं स वायुलोकमित्यादिसंदर्भगतस्य पाठस्य क्रमविनियामकत्वेन तत्त्वसामर्थ्यात्। अग्निवायुवरुण
लोकक्रमनियामकत्वं श्रुत्यादिप्रमाणाभावादिति प्रागेव प्रत्युच्यते। उदाहृतश्रुतौ देवलोकस्यैकस्य चिह्नातिपादकः
२ न ह्येदापि ह्यायुक्रमात्स्वेन विशेषणं। भवेदेतदेवं यद्युदाहृतवाक्यस्थितलोकभेदः प्रतीयते। स त
प्रदेशमात्रचर्चा॥ लोकभेदादित्तात्पर्यस्य तत्लोकभेदबाधितादिस्वपदेनादित्येव स्यानपेक्षे। तथा
दित्यलोकागमनमेव वायुनिमित्तमिति श्रौते क्रमनियमे पाठः पदार्थमात्रप्रदर्शनार्थ। आदर्यो
न्तक्रमायप्रभवति श्रुतिविरोधादिति सिद्धं। वाजसनेयिनां संवत्सरः लोको न पठ्यते। छांदो
ग्यानां देवलोको न पठ्यते तत्रोभयानुरोधादुभयपाठे मास एव धानं संवत्सरः पूर्वः। पश्चिमे
देवलोकः। नहि मासो देवलोके न संबध्यते। किं तु संवत्सरेणा तस्मात्तयोः परस्परसंबंधात्
मासारभ्यत्वा वत्सरस्य मासानन्तर्यं स्थिते देवलोकः संवत्सरस्य परस्ताद्भवति। तत्रादित्यानं
तर्यायवायोः संवत्सराधिक्यस्य स्थाने देवलोकाद्वायुमिति पठितव्यं। वायुशब्दादिति तस्मिन्ने राम
मन्त्रापि वायुचक्रनिवर्तयत्यपि संवत्सरं चमादित्याद्देवोचमायुमन्त्रि संभवतीति छांदोग्यपाठमात्रि

पृद्वयोर्नो। तदिदमाह वायुशब्दादिति विनि। तडितोऽधि वरुणः संबंधात्। तडिदंते ऽर्चिरादे
ऽध्वन्यः पतिः तडितः परः। तत्संबंधात् येंद्रादिरप्येतेः परः ध्यते। आगंतूनां निवेशो ते स्थानाभा
वोमासाश्रीतः। तथा चेंद्रादिरागंतः पश्चात्ते चाप्यः परः। आतिवाहिकास्तल्लिंगात्। मार्गचि
ह्नरूपत्वात् चिह्नान्यवा त्वेपरादयः। मर्त्ये भोगभूमयो वास्य लोकत्वान्ता हि वा हि। अर्चिरादि
शब्दा हि तत्त्वनादिस्थ चेतने भूमिरूढत्वत्तयो लोके। तत्रैषा लावव्विका तामवति यमवति।
सवृहन्नरूपात लंत्र क्रियाबुद्धि रुखास भवत्यचेतनानां। तस्माल्लोकशब्दवाच्यत्वात् भर्त्तंजी
वोत्तलो भोगभूमयश्चैति मत्वा मिहि। अपि चार्चिर्विषयइत्य स्मादयातां प्रतीयते। नेहेत्नाग्र
ग्रीष्टवतं पञ्चमी दृश्यते श्रश्चित् जाग्राहे इष्टमादिति ह्यग्गा वचने श्व जाग्रदित्वे हेत्वं पञ्चमी दृष्टा। न
चार्चिरादिशब्दा गुणवाचिनो येन पञ्चम्या तेषां वहतं प्रति हेतुत्वमुच्यते। अपादानत्वं वा चेत
निश्चलत्वे युष्मत्तीक्ष्ति नाति वाहिका। तथा मानवस्य पुरुषस्य विद्युद्धादित्रवाङ्गल दर्शनाद
ब र्चिरादीनामपि वोढत्वमवसेयम्। पौरुषत्वं हि वाचनिकं ससदर्थः तद्वा ब्रह्मसंचारयितृत्वमुचितः।

अपि वार्द्धिं नारदादीनां वीतहव्यानामानन्तवः पुरुषो वोढाश्रूयते। येमन्तुस्थूयतेततोप्यगच्छानोविद्युदादिव
ल्लाभ्विरादीनामपि वीतहव्यानामानन्तवः ५ मितितस्मात् मोगमन्नयस्यार्चिरादयोनालवाहिका
३ इतिप्राप्तेऽस्ववंतोभूतपिंडकरणानां हिंसूक्ष्मदेहवंतागतेनिस्वालोतस्वाते अन्यगायामाद्यानेतारो
वेलनास्तवईदृशीहितियमवतीगतिः स्वयंवाप्रेक्षावतो अप्रेक्षावतोवाप्रेक्षावत्प्रयुक्तस्य
गतौयुक्तंगलितस्थूलकलेवराः सूक्ष्मदेहवंतः संपिंडितकरणग्रामा उत्क्रांतिमंतेजीवा
त्मानोमनसम्प्रष्ठितवत्स्वयंप्रेक्षावतोयदेवंस्वातंत्र्येणगच्छेयुः स्वदेघपर्चिरादयोऽपिमार्ग
विन्हनिबाहशमीकारादिवत्। भोगाभ्यन्तयोवास्मिन्स्थीत्वा स्वात्तादिवदुमयथाप्यचेतनयानन्य
यनंप्रत्येयाभक्तिस्वातंत्र्यं। नचैकैरुमोत्यस्याचेतनस्यनेतुः कल्पनाम्रुतिश्रुतानांचेतनस्यसंभवे
नचपरमेश्वरस्यवात्मनेनेतिप्रुक्तं। तस्मात्प्रत्याधारणतयालोकपालग्रहादीनामकिंचित्क
रत्वप्रसंगात्। तस्मात्सर्वत्रस्थितस्यपरमेश्वरस्यसर्वाध्यक्षस्येयुपायपायतस्यंलोकपालास्यह राम
रीनां स्वात्मासमेवविहायाद्विरादीनामातिवाहिकत्वमेवदर्शनात्तत्सारात्क्वचार्यमितिप्राप्ते
इदमेवाधीसमानचपुरूषातिवहनलक्षणां लिंगमपोढ्लपार्थेषु कल्पं अनवस्थितत्वादर्ची

रादीनामिति। अवस्थितेर्हि मार्गचिह्नं भवति अव्यभिचारात् न वास्थितेरव्यभिचारादिति। अर्चिषयइति च
इतीयं रश्मीनापादानतो गुणत्वं चाप्रसिद्धत्वान्न वैशेषिकपरिभाषया नियम आस्थेयः। लोके विरोधात्
। अपि च तेष्वप्यभिसंभवंतीति संबंधमात्रमक्रममिति सामान्यवचनेन तद्विशेषापेक्षिणि स्फुटं।
यद्विशेषपदेनेन तत्सामान्यं नियम्यते। यथा ब्राह्मणानयं भोजयितव्य इति तद्विशेषापेक्षायां
यदा यत्संनिधावुपनियतं निपदं कुर्यादि तदा तेन तन्नियम्यते। एवमिहापीति। वैद्युतेनैव ततस्तच्छ्रुतेः
विद्युल्लोकमागतो मानवः पुरुषो वैद्युतः तेनैव नलवरुणादिना स्वयमभूतेन तच्छ्रुतेः। तस्यैव स्वयं वो
ढत्वश्रुतेः। वरुणादयस्तु तत्साहायके वर्तमाना वोढारो भवंतीति च सर्वं चोद्यं तेनेति सर्वमवदातं॥
पाठक्रमो बलवानिति यथार्थक्रमं पठ्यं सूत्राणि। परं जैमिनिर्मुख्यत्वात्। स एतान् ब्रह्म गमयतीति चिं
त्यते किं परं ब्रह्म गमयत्याहोस्विदपरं कार्यं ब्रह्मेति। मुख्यत्वादमृतत्वाप्तेः। परम[illegible]करणादपि। गं
तव्यं जैमिनिर्मेने लेपमेवाम्बरादिना। ब्रह्म गमयतीत्यत्र हि नपुंसकब्रह्मपदं परस्मिन्नेव ब्रह्मणि रू
ढत्वादनपेक्ष्य मुख्यं। सति संभवे न कार्ये ब्रह्मणि गौणकल्पनया व्याख्यानमुचितं। अपि चामृत

त्वफलावाप्तेर्न कार्यब्रह्म मुख्यं। सति संभवे न कार्यब्रह्मणि गुणकल्पना याथात्म्याख्यानस्योचिता। अपि च प्रा
६ प्त्युपपत्ते। तस्य कार्यत्वेन स्मरणाच्च भौतिकत्वात्। किं चात्र अपरमेव ब्रह्म प्रकृत्य प्रजापतिसभावेश्मप
त्वाद् यद्यव्यमानानापरब्रह्मविषया भवितुमर्हतीति प्रकरणविरोधात्। न च परस्मिन्सर्वगमे गति
र्नोपपद्यते। प्राप्तत्वादित्युक्तं। प्राप्ते पि हि प्राप्तिफला गतिर्दृश्यते। यथैकस्मिन्नन्यग्रोधपादपे मूलाद
ग्रमग्राच्च मूलं गच्छतः। शाखामृगस्यैकेनैव न्यग्रोधपादपेन निरंतरं संयोगवियोगौ भवतः। न चैतेन तदव
यवविषयान्न न्यग्रोधविषयाविति सांप्रतं। तथा सति न शाखामृगो न्यग्रोधेन युज्येत। न्यग्रोधावयवस्य
तदवयवयोगात्। एवं दृश्यमानानामपि द्रव्याणां न योगः तदवयवयोगात्। तदनेन क्रमेण तद
वयवेषु परमाणुष्ववतिष्ठेत। ते चातीन्द्रिय इति कस्मिन्नामायमनुभवपदमिति मध्यस्थास्संयोगस्तप
स्वी। तस्मादेकास्मिन्नप्यनुभवानुरोधिना प्राप्तकस्यागतिरेषितव्या। तद्ब्रह्मप्राप्तिफला
या गतेर्गतिश्चरो भविष्यति। ब्रह्मलोके स्थितिश्च बहुवचनेनैकस्मिन्नपि प्रयोगाल्लोकानामाग्नेराम राम
यितव्यं। लोकशब्दश्च लोकेन प्र[illegible]वर्तमपितव्यः। ननु संनिवेशाविशेषेष्वस्माद्वरब्रह्मप्राप्यगल्प
देशास्सा मर्यादा भवति। यथा विद्या। कर्मिवत्स्याद्दक्षिणा[illegible]दिनागतस्य मर्त्यलोकात्भिति क्रमपरं जगत्कारणात्

स लोकं। स्वयंप्रकाशमिति यावत्। प्राणस्य तत्रैव लिंगे प्रविलीयते। न तस्मात्प्राणा उत्क्रामंति। विना लिंगप्र
विलयं श्रुति। अत एव श्रुतिः। ब्रह्मापरम्। ब्रह्मैव सन्ब्रह्माप्येतीति। तदनेनाभिसंधिना परब्रह्म
गमयत्यमानव इति भेदेन जैमिनिराचार्यः। मन्त्रदर्शी बादरिर्दर्शी। कार्यं बादरिरस्य गत्युपप
त्तेः। कार्यमप्राप्तपूर्वत्वाद्गम्यमप्राप्यपरमात्मेति। प्राप्यत्वेन त्वसत्त्वपरं प्राप्तत्वात्करगतामलकं। तत्त्व
मसि वाक्यार्थसाक्षात्कारात्प्राप्तिर्न जीवात्मा अविद्याकर्मवासनाख्योपाधि व्यवच्छेदात् वस्तु
तोऽपि अवच्छिन्नत्वाभिन्नोऽपि लोकेभ्यो भिन्नमिवात्मानमहं मन्यमानः स्वरूपादन्यत्र प्राप्त
रर्चिरादिना लोकान्गत्वा प्राप्नोतीत्युच्यते। अद्वैतब्रह्मतत्त्वसाक्षात्कारवतस्तु विगलितनि
खिलप्रपंचस्य समवासविभ्रमनगंतव्यं। नगन्तिर्गमयितारमपि ति किं न संगतं। तस्मादनिदर्शनं
स्योपचरसंयोगविभागाः। न्योपचवानरवृक्षवत्तत्संयोगविभागात्। भिन्नभेदात्। न च तत्रा
पि प्राप्तप्राप्तिः कर्मज्ञेन हि विभागेन निरुद्धायां एवं प्राप्तस्य प्राप्त्यैवाज्ञरप्राप्तेरुपपत्तेः। ए राम
रपि च वस्तुतो विचारासहतया सर्वभेदनिर्वचनीयं विजृंभितमविद्यायाः समस्तमन्यद्वैतमत

तत्वसाक्षात्कारो न विद्वान्भिन्नस्तेन विदुषो विदेहपातात्पूर्वं स्थितस्य प्रवृत्तस्य यथाभासमात्रेण सं
सारिकधर्म्मानुवृत्तिरप्युपदेयत इमालिंगस्येह विनिर्दिष्टत्वेन मुक्तिस्थितिप्रामारभ्यादिति द्वेत्यनाप
५ रविद्याथतउक्तं तिप्राप्तिरेषा । ब्रह्मैव सन्ब्रह्माप्येति । तस्मात्प्रामारभ्य उक्तं मन्त्वेद्वैव समवर्ती
यं तस्मिन् । न याविद्या ब्रह्मप्राप्तिसमानकालता श्रूयते ब्रह्मवेद ब्रह्मैव भवति आनंदं ब्रह्म
णो विद्वान्न बिभेति । तदात्मानमेवावेदहं ब्रह्मास्मीति तत्सर्वमभवत् । तत्र को मोहः कः शोक
एकत्वमनुपश्यतः द्वैविभवति विद्वान्न बिभेति को मोहः पश्यत इति पौर्वापर्याश्रवणात्स्वरवि
द्यावतो मुक्तिं प्रतिनो यायान्तरापेक्षेति तत्त्वमसि मिति संधिश्रुतेः उपपन्नं चैतत् । तस्मात्स्वरूपं ब्रह्मैवेदं विश्व
महं ब्रह्मास्मीति परिभावनाश्च वाज्ञी वात्मब्रह्मसाक्षात्कारो त्कलिसायामनवयवेद्या विद्यायाम
स्तोगत विभागो विदुषः । तदभावे कथमयं चिरादिमार्गेण प्रयतेत । न च कायामात्रेण पिसांसा
रिकधर्मानुवृत्तिः तत्वपरसंयोगाद्दृष्टिकप्रवर्त्तेः श्रद्धाविहीनस्य दृष्टार्थी निष्कर्मी रोफल्ने ति राम
न फलं तिवा । दृष्टार्थानि अदृष्टार्थानां लं फलं नेकांकथा इल्लक्तं प्रथमसूत्रे । सवा चिरादिमार्ग
भावनायाः परं ब्रह्माप्राप्त्यर्थमविदुषः प्रस्तुपदेशः । तथा चक्रमं तरेषु द्विवनि त्यादिमुत त्रापिश्रा

द्रूसप्रवृत्तिरितिसांप्रत्तो। विकल्पासहत्वात् किमयंपरविद्याअनपेक्षापरब्रह्मप्राप्तिसाधयते। तद
पेक्षावा न तावदनपेक्षा। तमेवविदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति परब्रह्मविज्ञा
नादन्यस्यसाधनतः साक्षात्प्राप्तिप्रतिषेधात्। परविद्यापेक्षत्वेत्तुमार्गभावनायाः किमियंविद्याकार्ये
मार्गभावनासहायकं गमयतीति। अथ विद्योत्पादने। न तावत्तद्विद्याकार्येतयासहतस्याः द्वैता
द्वैतगोचरतया विद्याविद्ययोर्विरोधेन सहासंभवात्। नापि यज्ञादिवद्विद्योत्पादे साक्षाद्ब्रह्मप्राप्त्युपा
यत्वमुपकरणत्वेन ब्रह्म गमयतीति यज्ञादेस्तु विविदिषायां योगेन श्रवणात् तद्विद्योत्पादांगत्वे। त
स्मादुपपत्तेश्च ब्रह्मप्राप्तेरसंभवात् तन्मुख्यवृत्तिब्रह्मसामीप्यात्परे ब्रह्मणि लक्षणया नेतव्यः
तथा च लोके सति वक्तृवचनोपपत्तिः। कार्यब्रह्मलोकस्य सावयवत्वात् परत्वनेवयत्तयातद्दे
शोपपत्तेः। लोकत्वे वैलावरतादिवत्संनिवेशविशेषवति भोगभूमिभागेतिरूढत्वेन कथंचि
त्प्रयोगेन प्रकाशरूपात्मनि भवति। तस्मात्साक्षाद्दर्शी भगवान्बादरिरसाक्षाद्दर्शी तु जैमिनिरितिसिद्धं। अ ग
प्रमाणिकानामलं प्रलापाः। सर्वगतस्य ब्रह्मणः सर्वगतत्वे चैतर्मानेदादयस्थाप्यतिनः

परमात्मनो भेदाभेदवंतो गुणादृष्टादयो दृष्टा एव नाप्यभावाः अप्रामाणिकत्वमावहंति न ह्यत्व
मिस्पृष्टिताः अथ योजनात्मप्रत्यगात्मत्वाद्युगंतहणाप्रतिश्चेद्वर्त्तिगद्धलितितिप्रत्यक्षुपातिनावर
मित्रत्वमतदात्मत्वात्तत्त्वगतहणां जीवात्मनामिति गौणी तत्रत्येति यौगिकमिहि यौगरूरणापेक्षा
याणो एष च विशुद्धोपाधि संबंधमिति। मनोमयत्वादयः कार्यात्मादविशुद्धा अपि श्रेयो हेत
त्वाद्विशुद्धाः प्रतिसंचरो महाप्रलयः प्रतिपत्यभिसंधिः। प्रतिपत्तिर्गतिः प्रदेशात्पर्यत्वात
अभिसंधिस्तात्पर्यं। यस्त्वब्रह्मरोमानामश्च अभिधानयस्यद्भुति एवं बान्यविद्देनेति। स्तुतिवा
वाक्यबलीयस्त्वप्रकरणात्। सगुणोपि च ब्रह्मणीति प्रसंसार्थमित्यर्थः। चोदयति। ननु गतस्या
पि पारमार्थिकी गतस्मतादेशांतरविशिष्टप्रतीति न्यग्रोधस्य नरहं तत उपपादितं परिहरति। न
प्रतिसिद्ध सर्वद्विविशेषत्वात्स्वत्यरादिति। अयमभिसंधिः यथा तथा चान्यग्रोधावयवी
परीणामवानुपजनायाय धर्मभिः कर्मजैः संयोगविभागैर्युज्यते। अयं पुनः परमात्मानि राम
विह्यखिलभेदप्रपंचः कूटस्थनित्यो न न्यग्रोधवत्संयोगविभागभाक् भवितुमर्हति। कात्य

निकसंयोगविभागयोगस्तु काल्पनिकस्यैव कार्यब्रह्मलोकस्योपपद्यते। न परस्य। शंकते। जग
दुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतेरिति। न ह्युत्पत्त्यादिहेतुः तत्स्वभावोऽपरिणामिनः संभवति। त
स्मात् परिणामीति। तथा च भावविकारस्योपपद्यते। गतमसत्त्वमित्यर्थः। निराकरोति। न विशे
षनिराकरणश्रुतिनामिति। विशेषनिराकरणं सर्वमस्तु शोकादिदुःखप्रशमनतया पुरुषार्थ
फलं वत् सत्त्वादिविधानं। तस्मात्फलवतः संनिधावाम्नायमानं तदर्थमेवेत्यतः तदुपपत्तिः
। तद्धि जिज्ञासस्वेति श्रुतिः तस्माच्छ्रुत्युपपत्तिभ्यां निरस्तविशेषं ब्रह्मप्रतिपादनपरा एवाम्नायो
न तु सृष्ट्यादिप्रतिपादनपरः। तस्मान्न जगज्जन्मादिविक्रिया। अपि चेयं गतिर्न विचारं सहते तदुच्यते गति
कल्पनायां चेति असमानन्यायाश्रयायाविकारपक्षौ। अन्योन्यावालंब्यते। अथ कस्मादालंब्यते इति क
मनन्यत्वेन विकल्प्यते तदुच्यते आह। अखंडवदात्मेति। यदा तत्त्वतया हि स्वभावेन घटादयो भावा
स्तद्विकारा प्राप्ताः तद्भावेन भवन्ति। पिंडापेक्षत्वाभावादिति। विकारावयवपक्षयोश्च।
तद्वत्तः। सह विकारावयवैः स्थितत्वात् अचलत्वात् ब्रह्मणः संस्कारलक्षणागमने विकारा।

नयत्वयोरुपपत्तेः। नहि हि स्थिरात्मकमस्थिरं भवति। अन्यानन्यत्वेऽपि चैकस्य विरोधादसंभवितो इतिभा
वः। अथात्मस्य जीवो ब्रह्मणः स्वस्याच ब्रह्मरूपसंभवत्वविजीवस्य संसारः कल्पित इति। एतद्विकल्प
दूषयति। सोऽप्यणुरिति मध्यमपरिमाणो वा इति मध्यमपरिणामात्मनां घटादीनामनित्यत्वप्रसंगात्
अनन्तस्यैकत्वेति भेदाभेदयोर्विरोधेनैकत्रासंभवात् बुद्ध्यपदेशाभेदभेदे। यथोक्तास्मि
द्यादुपचारेणाभिन्नमध्यतद्रूपमपरत्वमपरस्यैकत्वमित्यर्थः। अपि च जीवानां ब्रह्मावयवत्वप
रिणामत्वेन भेदपक्षे बहुलाल्विकाः संसारित्वेऽपि मन्तोः स्वभावहेतोर्ज्ञानानां विनाशप्रसंगः
ब्रह्म विवर्तत्वेन ब्रह्मैवैषां स्वभावः प्रतिबिंबानामपि बिंबं। तन्नाविनाशीति न जीवस्य वि
नाशाद्भ्रमाह। सर्वेति। मतांतरमस्य स्याति दूषयितुं। यत्तत्केऽप्युक्तं जल्पते तेविनैव ब्र
ह्मज्ञानं नित्यनैमित्तिकानीति। यथा हि कपालनिमित्तो कूरउपात्तस्य कपालस्य विशेषवर्णादि
भिः प्रत्यये कपालांतरोत्पत्तिनिमित्तद्रव्यादिवर्जनेन प्रशान्तोऽपि न पुनर्भवति। एवं कर्मनि राम
मित्तो बंध उपात्तानां कर्मणामुपभोगात् प्रत्ययेप्रणाश्यति। कर्मांतराणां चबंधहेतूनां

नामननुष्ठानात्। कारणाभावे कार्यानुत्पत्तेर्बन्धाभावात् स्वभावसिद्धो मोक्ष इत्यारोप्य निव
उपात्तदुरितनिर्हरणाय च नित्यनैमित्तिककर्मानुष्ठानात् दुरितनिमित्तः प्रत्यवायो न भवति
प्रत्यवायानुत्पत्तौ च स्वस्वरूपान्तो न विषिद्धाभ्याचरेदिति। दूषयति। तदसत्तु प्रमाणाभावादि
ति। शास्त्रं खल्वस्मिन् प्रमाणं तत्त्वमोक्षस्यात्मज्ञानमेवोपायं दर्शयति न तु कर्माचारं। न चाप्रो
पपत्तिः प्रभवति संसारस्यानादितया कर्मणामसंख्येयस्य नियतविषयककारस्य मो
गेन क्षेतुमशक्यत्वादित्याह। न चेतत्तर्कयितुमपीति। चोदयति स्यादेतत् नित्येति परिहर
ति। तत्त्वविरोधाभावादिति। यदि हि नित्यनैमित्तिकानि कर्माणि सुकृतमपि दुरितमिव निव
र्युः ततः काम्यकर्मोपदेशाः दत्तजलांजलयः स्युः सेप्रेर्यरन्। नह्यस्ति कश्चित् यो हस्व सदा या
चामरः श्रम्य नित्यनैमित्तिकानि करोति तस्मात्तेषां स्वकृतविरोधो नेति। अभ्युपगम्य
त्रमाह। न चानित्यनैमित्तिकानुष्ठानादितिः। न न चासति सम्यग्दर्शन इति। सम्यग्द
हि विरक्तः। काम्यनिषिद्धवर्जयन्नपि प्रमादादुपनिपतितेऽतेनैव सम्यग्दर्शनेन क्षपयति

ज्ञानपरिपाकं च न करोत्येव अस्तु नित्यशुद्धोऽपि प्रमादात् करोतीति कृते त्वन स्थापयितुं समर्थ इति वि
विशेषः। नचानभ्युपगम्यमाने ज्ञानगम्य ब्रह्मात्मत्व इति। कर्तृत्वभोक्तृत्वे समाहित्य तत्रिप
ञ्जो नैव रागमतः स्वभावाववधारिते नत्वाऽन्योऽपि तैर्नमकाव पनेतुं। नहि स्वभावात्माको
२ ऽपरोपयितुं शक्यो। भावस्य विनाशप्रसंगात्। नच भोगोऽपि सत्त्व भावः। शक्योऽसत्कर्तृ
त्वभोक्तृत्वनीलेमस्यालंकारकं शङ्करात्पिकत्वं तदिदम् कर्तृ स्वभावस्यापरिहार्यत्वादिति। समा
रोपितस्य तु अनिर्वचनीयत्वात् स्वभावस्य शक्यस्त्वत्वानेनावरोपः कर्तृत्वं रज्जु
तत्त्वेनेनेति भावः। भावसिममविद्वान् परिचोदयति। स्यादेतत् कर्तृत्वभोक्तृत्व कार्यमिति
अप्रकाशितभावाय योऽनुभवसमाधत्ते तत्र नेति। कर्तृत्वभोक्तृत्वयोर्निमित्तसंबंधस्य
प्रतिहारेलानित्यत्वात् नविद्याद्दितिकया चिदेषां समर्द्धापयेत्यतः सुखदुःखेभोहेत्वेति इति
संभवनात्तःकुलः कैवल्यनिश्चय इत्यर्थः। अप्रतीकालंबनान्नयतीति बादरायण उभयथा राम
दोषात्तत्क्रतुश्च। अब्रह्मक्रतवो यत्तिययापंचाग्निविद्यया ब्रह्मलोकं प्रयास्यंति प्रतीको
पासकास्तथा। संति हि मनो ब्रह्मेत्युपासीतेत्याद्याः। प्रतीकप्रियमयाविद्यालब्धंतोपद्धि

रादिनामादिगणकार्यब्रह्मोपासकानेवगंतव्यमेहस्यनियमः सर्वेषामविशेषेणविद्यांतरो
ष्वपिगतेरवतारणात्। नचैषांपरब्रह्मविदामिवगत्यसंभवलिंगब्रह्मक्रतवएवब्रह्मलो
कगामिनस्तत्क्रतुत्वापेक्षितं अतत्क्रतूनामपिपंचाग्निविदांनयनश्रुतेः। नचैतेनब्रह्मक्र
तवोमनोब्रह्मेत्युपासीतेत्यादौसर्वत्रब्रह्मानुगमेनतत्क्रतुत्वस्यापितत्संभवात्॥ फल
विशेषस्यब्रह्मलोकेभावादपुनरावृत्तेः। तस्यभावयवतयाउत्कर्षनिकर्षसंभवादितिप्राप्तेप्र
चष्टे। उत्तरोत्तरभूयस्त्वादब्रह्मक्रतुभावान्नतः। प्रतीकोपासकान्ब्रह्मलोकंनामानवोनयेत्। भव पा
त्पंचाग्निविद्यायामब्रह्मक्रतूनामपिब्रह्मलोकनयनंवचनात्। किमिवहिवचनेनकुर्मोना
स्तिवचनस्यातिभारः। इहतदभावात्नयथायथोपासतेतदेवभवतीतिश्रुतेरौत्सर्गिकन्यायानि
स्तितिविशेषवचने, यवादोपृज्यते। नचप्रतीकोब्रह्मोपासतेसब्रह्मत्वमपिब्रह्मैव्यक्रमेकिंतुना
मादिब्रह्मदृष्टतया। तथाखल्वयंनामादिरतंत्रोनब्रह्मतंत्रः। आश्रयांतरप्रत्ययस्याश्रयांतरे
प्रक्षेपः प्रतीकइतिहिवृद्धाः। ब्रह्मायंचप्रत्ययोनामादिमुपादित्सइतिनामतंत्रः तस्मान्नतदु

५

पासकोब्रह्मक्रतुः किंनामादिक्रतुः। नचब्रह्मक्रतुत्वेनामाद्युपासकानामविशेषादुत्तरोन
रोत्कर्षः संभवी। नचब्रह्मक्रतुस्तदवयवक्रतुर्येनतदवयवापेक्षयाउत्कर्षोकर्षेतातस्मात्प्र
तीकालंबनाद्विदुषोवर्जयित्वासर्वान्नयातिकारालंबनान्नयत्यमानवोब्रह्मलोकं। नह्येव
मुभयथाभावेउभयथात्वेकांश्चित्प्रतीकालंबनान्नयतिविकारांतरालंबनान्नयत
त्यभ्युपगतेकश्चिद्दोषोऽस्यनियतःसर्वेषामित्यस्यन्यायस्येतिसर्वमवदातं॥ श्री॥ ॥इ
तिश्रीवाचस्पतिमिश्रविरचितेभगवत्पादभाष्यविभागेभामत्यांचतुर्थाध्यायस्यतृ
तीयःपादःसमाप्तः शुभमस्तु॥ ७॥ श्री॥ ७॥ श्री॥ ७॥ श्री॥

राम

वाचस्पति चतुर्थाध्याये चतुर्थपादारंभः

श्रीगणेशाय नमः॥ संपद्यादि विमुक्तिष्ठेन साध्यात्। प्रागभावस्य नित्यत्वे कर्तृत्वं न स्यात्तो यतः। फ
लत्वेन प्रसिद्धस्य जन्मनो रूपान्तरोद्भवः। प्रागभावस्य घटादर्शने वर्तं निष्पत्तौ पुनरुत्पत्तौ न सत्तौ व
१ ऽसत्तौ वा। न ज्ञानं गगनतत्कुसुमे न निष्पाद्यते। स्वरूपावस्थानं चेदात्मनो मुक्तिर्निःश्रेयसं नि
ष्पाद्यते। तस्य गगनवदसत्त्वे न सतः प्रागसत्त्वाभावात्। न चास्य वंध्याभावो निष्पाद्यते। त
स्य तु स्वभावस्य कार्यत्वेनानित्यत्वप्रसंगात्। फलं च प्रसिद्धं स्वभावोऽनुस्या कार्यस्य केवल
[redacted] फलत्वकल्पनात्। आगन्तुना रूपेण। केन विद्युत्साहैः स्वमिति प्राप्तमनु
व ष्यत इति प्राप्ते प्रमीयते। संभैत्यर्थवत्त्वे हि नानर्थकमुपेयते। वंध्यस्य सदसत्त्वाभ्यां रूपमे
के विशिष्यते। अनधिगतावबोधनेऽस्त्रिमा प्रमाणविशेषतः शाद्वः। आगत्याः कथं विद्गुणाय
तया वर्ण्यते। सकल सांसारिक धर्मापेतं तत्प्रसन्नमात्मरूपमभ्रसन्नात्तत्स्मादेवं रूपाद्यात्
नमनधिगतमवबोधयन् नानुवादोऽपजुप्यते। न चास्य निष्पत्त्यसंभवः स तद्भवद्यद्दादेः सांव्य राम
वहारिकेण प्रमाणेन वंध्यविगमस्यापि निष्पन्नेत्त्वलोकसिद्धत्वात्। विचारासहहतयात्वति

द्धिरूपयत्रापि सुप्तः। न ह्यस्मादुक्त्वा तु महात्मसंप्रसादावेदितः। अंधो भवतीति स्वप्नावस्था दर्शि
ता। बाह्येंद्रियव्यापाराभावात्। रोदितीवेति जाग्रदवस्था दुःखशोकाद्यात्मकत्वात्। विनाश
मेवापीत इति सुषुप्तिः। एवकारस्यार्थेनावधारणे आत्मा प्रकरणात्। ननु ज्योतिरुपसंपद्य
स्वेन रूपेणाभिनिष्पद्यत इति पौर्वापर्यश्रवणात् स्वरूपनिष्पत्तेरन्या ज्योतिरुपसंपत्ति
। तथा च भौतिकत्वेपि न मोक्षव्याघातः। नैवं यद्धि ज्योतिरुपसंपद्यत इत्यत्र ज्योतिः श्रूयते त
तदध्याहारेपि तत्प्रतिपादनवैयर्थ्यात्। तदपरित्यागे च ज्योतिषैव स्वेन रूपेणेति गम्यते। तस्य च
भूतत्वे विकारत्वात् मरणधर्मकत्वप्रसिद्धेर् मुक्तत्वमिति प्राप्ते प्रत्युच्यते। ज्योतिःपदस्य मु
ख्यत्वं भौतिके यद्यपि सिद्धं। तथापि प्रक्रमाद्वाक्यादात्मन्येवात्र प्रयुज्यते। परं ज्योतिरिति वि
परपदसमभिव्याहारात् परत्वस्य चानपेक्ष्य ब्रह्मण्येव प्रवृत्तेः ज्योतिषि वावरे किंचिदपेक्ष्य
परत्वात्। परं ज्योतिरिति वाक्यादात्मैवात्र गम्यते। प्रकरणं चोक्तं। यत्संपद्याभिनिष्पद्यते इ
ति तत्र मुख्यं स्यादायस्वपीतीतिवत्। तस्माज्ज्योतिरुपसंपन्नो मुक्त इति सिद्धं॥ अविभागेन

दृष्टत्वात्। यद्यपि जीवात्मा ब्रह्मरूपेण निष्पन्न इति तत्र तत्रोपपादितं। तथापि स तत्र पर्येतीत्या
धाराधेयभावव्यपदेशस्य संपन्नसंपन्नत्वभावव्यपदेशस्य च समाधानार्थमाह। ॥ ब्राह्मे
२ ण जैमिनिरुपन्यासादिभ्यः॥ उपन्यास उद्देशो ज्ञातस्य। यथा य आत्मापहतपाप्मेत्यादि
तथा अज्ञातज्ञापनं विधिः। यथा स तत्र पर्येति जक्षत् क्रीडन् रममाण इति तस्य सर्वेषु लो मा. ४
केषु कामचारो भवतीत्येतदज्ञातज्ञापनं विधिः। सर्वज्ञः सर्वेश्वर इति व्यपदेशः। नायमु
द्देशो विधेयान्तराभावात् नापि विधिरप्रतिपाद्यत्वात्। सिद्धवत् व्यपदेशात्॥ तन्निर्वच
नसामर्थ्यादयमर्थः प्रतीयते। तस्मात् उपन्यासादयः। एभ्यो हेतुभ्यः भावाभावात्मके रू
णाविवेकैः परमेश्वरः मुक्तः संपद्यते स्वैरित्याह किल जैमिनिः। न च वितत्स्वभावस्य। ततो अ
भावत्वतो अभावात्मनो अपहतपाप्मत्वादयो भावात्मनः सर्वज्ञत्वादयो धर्मा अद्वैते
विरुध्येते। नो खलु धर्मविरोधे धर्मी भिद्यते। नाम रूपवत् धर्मिभावाभावः इति जैमि राम
निराचार्य उवाच। चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः। अनेकाकारत्वेक स्वमेकत्व

नैकतामतां। परस्परविरोधेन न भेदाभेदसंभवः। न ह्येकस्यात्मनः पारमार्थिकानेकधर्मसं
भवः। तेनैव स्वात्मनो भिद्यते। द्वैतापत्तेरद्वैतश्रुतयोर्व्याहन्येरन्। अथ न भिद्यते। तत एकस्मादात्मनो
भेदान्निर्योपि न भिद्येरन् नात्मरूपं वा भिद्येताभिन्नेभ्यो ऽनन्यत्वात्। न च धर्मिणा आत्मनो न भि
द्यते भिद्यन्ते भिद्यत इति सांप्रतं। धर्मभेदे तदनन्यत्वेन तेषामप्यभेदप्रसंगात्। भेदे वा धर्मिणोऽपि भे
दप्रसंगादित्युक्तं। भेदाभेदौ च परस्परविरोधादेकत्र न संभवइत्युपपादितं प्रथमसूत्रे। आनंदरूप
णां त्वद्वैताविहतत्वेपि स्वस्वपापादेः कल्पनिकतया तदधीननिरूपणानां तेषामपि क
ल्पनिकत्वमिति न त्वालिकीन् तद्धर्मीताश्लिष्यते। एतेन सत्यकामा। सर्वज्ञत्वसर्वेश्वरत्वाद
योप्योपाधिका व्याख्याताः। तस्मान्निरस्ताशेषप्रपंचेनाकारदेश्येन चैतन्यमात्रात्मना भिनि
ष्पद्यमानस्य मुक्तात्मनो ऽर्थेऽन्त्येरेवापहतपाप्मसत्यकामादिशब्दैर्व्यपदेशात्तत्पौद्गलो
मिर्मित्ते। तदिमत्स्वदविकल्पज्ञा एवैते अपहतपाप्मादयोः न तत्संबन्धरोरिकात्रपीति। स्वं
मप्युपन्यात एवं हमिरोधं वादरायणः। तदेतदतिशैघ्र्यमुद्राहं लोमिन्स्वे सूत्र्यते। वादरायण

वा.४।४

२ १

आचार्यमरण्ये अपिहितत्स्मतं। एवमपीसौडुलोमिमतमनुजानाति। शौडीरंगन सहस्तद्वत्या
हृ्यवहारापेक्षयेति। एतदुक्तं भवति। सत्यं तात्त्विकानंदचैतन्यमात्र एवात्मा। अपहतपा
प्मत्वसत्यकामादयस्तूपाधीकतया अतात्त्विका अपि व्यावहारिकप्रमाणोपनीततया लो
कसिद्धानां सतां संतोयेन न तद्ग्राहो। विरइतिवदवास्तवाइत्यर्थः। संकल्पादेव तत
छ्रुतेः। यत्नानपेक्षः संकल्पो लोके वस्तुप्रसाधनः। न दृष्टः सोऽत्र यत्नस्य लाघवादवधारि
तः। लोको हि किंचिदर्थं चिकीर्षुः प्रयतमानः समीहते समीहमानस्तमर्थं प्राप्नोतीति क्रमो
दृष्टः। न चिकीर्षानंतरमेवाभिप्रेतमाप्नोऽपतिष्ठते। तेन श्रुत्यपि लोके वृत्तमनुरुध्यमानाया
विद्वत्सादृश्यएव क्रमोऽनुमंतव्यः। अवधारणं तु संकल्पादेवेति लौकिकं यत्नगौरवमपेक्ष्य
विद्याप्रभाववतो विदुषः प्रयत्नलाघवात्। यत्नभूतदस्तत्कल्पमिति। स्यादेतत्। यथा मनो
रथमात्रोपस्थापिताः पत्नीस्त्रिरागानां च स्मधातुर्विसर्गाहितरेवं पित्रादयोऽप्यस्य संक
ल्पोपस्थापितोऽकल्पिष्यंते स्वकार्यायेत्यत आह न संकल्पमात्रसमुत्थानादृष्ट इति। संति हि

राम

कानिचित्तत्स्वरूपसाध्यानि कार्याणि यथा स्त्रीवस्त्रसाध्यानि दंतद्गतमाणिमालादीनि
कानिचित्तत्तज्ज्ञानसाध्यानि कार्याणि यथोक्तानि चरमधातुविसर्गरोमहर्षादीनि । त
त्र मनोधर्मात्रोपनीते पित्रादौ भवंतु । तज्ज्ञानमात्रसाध्यानि कार्याणि । ननु तत्साध्यानि
मवितुमर्हंति । नहि हैस्वरोमहर्षादिमद्वंति स्त्रीवस्त्रसाध्यमणिमालादयः । तद्विदम्
र्कं पुष्कलं भोगमिति तिरः वं प्राप्ते सत्यमिधीयते । पित्रादौ नाम समुच्छास्तं संकल्पादेव तत्र छुतेः ।
नचानुमानबाध्ये श्रुत्यात स्यैवबाधनात् । प्रमाणांतरानपेक्षा हि श्रुतिः स्वार्थे गौरवं वर्त्यंती
नमानांतररोध्याबाधितं । अनुमानमेव तस्योत्पादापपक्षधर्मत्वादिवत्मानांतराबा
धितविषयत्वं स्वसामग्रीमध्यनिपातेनापेक्षमाणं सामग्रीखंडनेन तद्विरुद्धयाश्रुत्या बा
ध्यते । अतएव नरशिरः कपालादिशौचानुमानमागमापबाधितविषयतयानोपपद्यते
तस्माद्विदशाप्रमाणात् विड्घासैकल्पमात्रादेव पित्राद्युपस्थानमिति सांप्रतं । यथाहुरागमिनः । को
हि योगप्रभावादृते आगस्त्य इव समुद्रं पिबति । स एव चदंडकारण्यं सृजति । तस्मात्सर्वमनवद्यं ते ।

अभावं बादरिराह ह्येवं ॥ अन्ययोगव्यवच्छित्त्या मनसेति विशेषणात्। देहेंद्रियवियोगः स्यात्तद्विदुषो
बादरेर्मते। अनेकधाभावश्रुतिः प्रमाणं वा मनोभेदात्। स्तुतिमात्रं वा कथंचित्। भूमविद्यायां
निर्गुणायां तदसंभवात्। अमनतापि हींद्रियैरेन स्तुतिर्भवत्येवेति। भावं जैमिनिर्विकल्पामन
शरीरेंद्रियभेदेन नानाभावः समंजसः। न चार्थसंभवेप्यत्र स्तुतिमात्रमनर्थकं। न हि मनोमात्रभेदे स्फु
टतरोऽनेकधाभावो यथा शरीरेंद्रियभेदे। अतएवासौभरेर्भिर्निर्मितविविधदेहभेदस्य पर्या
येण मांधातृकन्याभिः पंचाशता विहारः पौराणिकैः स्मर्यते। न चार्थसंभवे स्तुतिमात्रमनर्थक
मवकल्पते। संभवति चास्यार्थवत्त्वे। यद्यपि निर्गुणायामिदं भूमविद्यायां पाठ्यते तथापि तस्या
उपरस्तादनेन सगुणावस्थागतेनैश्वर्येण निर्गुणैव विद्या स्तूयते। न चान्ययोगव्यवच्छेदेनैव विशेष
णमयोगव्यवच्छेदेनापि विशेषणात्। यथा चैत्रो धनुर्धर इति। तस्मान्नरः शरीरेंद्रिययोग ऐश्वर्यशा
लिनां नियमेनेति मेने जैमिनिः। द्वादशाहवदुभयविधं बादरायणोऽतः। समनस्केति केवलमनो
विषयां च स एकधा भवति त्रिधा भवतीति शरीरेंद्रियभेदविषयां च श्रुतिमुपलभ्यानियमवादी

राम

स्वत्नुत्वादरायणो नियमवादी । एवं ह्ययोर्न्न सहतेद्विधश्रुत्यनुरोधात् । न चायोगव्यवच्छेदेनैवं विधेश्रुवि
शेषणमवकल्पते । कामेबुहिरमरणंसमनस्कंद्वियेणशरीरेणपुरुषाणांसिद्धयेमेवेति । नास्ति संक
मनोयोगस्वेति तद्व्यावच्छेदो व्यर्थः । सिद्धस्यत्वनुमनोयोगरागस्यत्तेरस्य परिसंख्याने नार्थवत्त्वमव
कल्पते । तस्मादात्मेना नात्पश्यतीतिवदन्यायोगव्यवच्छेद इति सांप्रतं । द्वादशाहवदिति द्वादशा
हस्य सत्रत्वमासनोपायिचोदने । अहीनत्वं च यजतिचोदनेसतिगम्यते । द्वादशाहमृद्धिकामा उपे
युरित्युपायिचोदनेन य एवं विद्वांसः सत्रमुपयंतीति च द्वादशाहस्य सत्रत्वं बहुकर्तृकस्य गम्यते
एवं तस्यैव हि द्वादशाहेन प्रजाकामं याजयेदिति यजतिचोदनेन नियतकर्तृ[redacted] परिमाणत्वेन
चाहिरात्रेण यजेतेत्यादिवत् । अहीनत्वमपी गम्यत इति । संप्रत्तिशरीरेद्रियाभावे मनोमात्रेण विद्व
त्स्वप्नवत्स्वप्नोभोगो भवति । कुतः । उपपत्तेः । मनसैवतानिलिप्सुतेयदिपुनः सुखमनस्कभोगो भवेत्तनैयाश्रुतिरुपपद्यते
न च भावस्य बहुपभोगः । शरीराद्युपहितस्यैवैपपत्तेः । स्वप्नशरीरस्य त्वपुष्कलो भोगः । इहाप्युपपत्तेरत्वानुषंजनीयात्तदिद
ऽनुक्रमश्चाप्यांतत्वभावे संभ्यापद्युपपत्तेः । भावेजाग्रदितिदिति । प्रदीपवदावेशः तथाहिदर्शयति । वस्तुतः परमात्मनोऽभिन्नो

विद्यानाम्ना अनाद्यविद्याकल्पितप्रादेशिकांतःकरणावच्छेदेन नानादिजीवभावमापन्नः प्रादेशिकः सन्नहंतानाभिस्व
भावविनिर्मितानामपि नानादेशावच्छिन्नांतःकरणोयुगवद्दानेमर्हति। न चासांतरं सुषुप्तमपि सज्यमानस्य स्मृतिरेकैका
नामलब्धा दाम्नैव वाकर्तिकर्मभावाभावात्। भेदस्याश्रयत्वादस्य। नाप्यंतःकरणांतरं तत्र संसजति। स्वस्वमारामस्यतदुपाधि
त्वाभावात्। अनादिनाद्यंत्वंतः। करणे नोत्पत्तिकेनायमनुद्दिष्टेनेदानीं तेनेनांतःकरणेनोपधेयतया संबंधुमर्हति।
तस्मादवश्यादारुयंत्रं तस्त्रयोक्तुं चेतनेनाधिष्ठितं सत्पदिकामनुरुध्यतद्द्वांनिर्माणकपाराशरापपिशेद्विद्यायारणीतिप्राने प्र
त्यभिशब्दयते। शरीरं न जातु स्यात्। भोगाधिष्ठानतां चिन्नाम त्रिधेति शरीरं लनुक्तं वनाद्भैस्त्रियाभावत्तिपंचधास
ध्यानवधेस्पादिका श्रुतिर्हि विद्बोनावाभावमाचतत्स्यामभिअपहरिं द्वियोपाधिसंबंधेश्रवकल्पितेनादेहस्थलभेदेन
द्विवंशाविभिन्नाविभिन्नातिर्म्मो धवादयस्येत्रवाहोनानात्वेनापदिश्यते। भोगाधिष्ठानसत्त्वं तु शरीरत्वं नाभोगाधिष्ठ
मेयं ते द्विवयुज्यते। तस्मादेहांतराणि भसजति। न चाप्येनानधिष्ठितानि देहपट्टे वर्तंते। न च सर्वगतस्य वस्तुने
विगलितप्रायाविद्यस्य विदुषः इषम्प्रगनस्पेवोत्पत्तिकान्तः। करण वशवत्ता। येन तदौत्पत्तिकमांतुकांतःकरण
नेसंबंधम एववारयेत। तस्मात्विद्वानस्वैव स्ववशादिवस्पेषुरः सेंद्रियमनांसि शरीराणि निर्माय तानि विशत्परेप्रवि राम
श्यतत्रेंद्रियमनःकरणाः तेषु लोकेषु मुक्तो विहरतीति सांप्रतं। अहोपचवृत्तिलनिदर्शनं ग्रहद्वायस्त्रैवकांक्षप्रदीप

व्यक्तिषु यच्च यतेतस्मिन्नवृत्तिवर्त्तिनी नोऽत्र द्रष्टव्यमस्तु नाम भेदानविद्यारज्ञो बाधाद्द्रष्टृभेदे षोऽद्वइति परमार्थः। एकमनो नु
वर्त्तिनी एकामिश्रावतीत्यर्थः। संपन्नः केवलोमुक्तत्वं च्यते। न चैतस्य स्वस्थं भावसंभः। श्रुतिविरोधादित्सलेय
जातमात्रिपतति। कथं पुनर्मुक्तस्येति। सलिलसुक्त इति। सलिलमिव सलिलः सलिलप्रातिपदिकात्सर्वप्रा
तिपदिकेभ्यः इत्युपमानाद्वाचारे क्विपि कृते पचाद्युवि वा ते रूपं एतदुक्तं भवति। यथा सलिलमंभोनिधौ
प्रक्षिप्तं तदेकीभावमुपयात्येवं द्रष्टापि ब्रह्मणेति। अत्रो त्रैरूप्यं। स्वापसंबन्धोरव्यापेक्षमाविष्कृतं हि। आद्युका
स्थितस्य लयः सुषुप्तमपेक्ष्य काष्ठिर्व संपत्तिः। तदधिकारात्। एषोऽर्थस्तुतयस्तुस्युक्त विद्याविद्याकावस्थापेक्षा
मुक्त्यभिधानं तु तदवस्थायास्तस्यासत्त्वेर्यथाद्गुणार्थाने संध्यायां दिव्यसाभिधानं जगद्व्यापारवर्जप्रकरणा
दसन्निहितत्वाच्च। स्वराज्यकामचारादिश्रुतिभ्यः स्यान्निरंकुशः स्वकार्यैश्वराधीनसिद्धिरप्यत्रसाधक
प्राप्नोति स्वाराज्यं सर्वैस्मै देवा बलिमावहंति सर्वेषु कामचारो भवतीत्यादिश्रुतिभ्यो विदुषः परब्रह्मणा
द्वास्यानधीनमैश्वर्यमवगम्यते। नन्वस्य ब्रह्मोपासनात्तद्वमैश्वर्यं कथं ब्रह्मानधीनं सत्त्वं। उक्तमेतौ ब्रह्मा
धीनं न तत्स्वभावे। नहि कारणाधीनजन्मनो भावः स्वकार्यत्वे कारणापेक्षंते। किंत्वात्र ते स्वतंत्राण्येव। यथा
दुः। नहि दंडचक्रादि घटोजन्मन्यपेक्ष्यते। उदकाहरणेत्वस्वतदपेक्ष्यन विद्यते नच विदुषां परमे
श्वराधीनैश्वर्यं। सिद्धत्वात्तु न तमैश्वर्यं। जनलौकिकाद्बेत्रजनो महाराजाधीनाः स्वव्यापारे विद्वांसः
परमेश्वराधीना भवेयुः। न खलु यदधीनोत्पादं यस्वरूपं तत्र तदधीनं भवतीति कश्चिन्नियमः। तत्समा

नां तदधिकानां च दर्शनात्। यथा ह्यंतेवासी गुरोरधीनविद्यः तत्समस्तदधिको वा दृश्यते। दृष्टसामंतास्तु पा
र्थिवाधीनैश्वर्याः पार्थिवैर्वैः। स्पर्द्धमानास्तान्विजयमाना दृश्यन्ते। न हीह निरतिशयैश्वर्यत्वात्परमेश्वरस्य सा
म्यमनुभवन् विद्वांसस्तेऽधिका। स्तत्समा वा भविष्यंति। तथा च न तदधीकता। न हि समप्रधानभावानामभि
मिथोऽपि हा। तदेते सर्वेऽनंताः संतः। तद्व्यापारे जगत्सर्जनेऽपि विवदेरन्निति प्रामाण्यमभिधीयते। नित्यत्वादनपेक्षा
त्वाच्च तेषां तस्य ब्रह्मादयोऽपि ऐकमत्याच्च विदुषां। परमेश्वरत्वं ज्ञाता। जगत्सर्गाऽलंकरणं। तस्यैव नित्यकार्यकारे
लौकस्वभावस्यैव भवत्। आहो कार्यकारणस्वभावस्यतत्त्वो भयस्वभावस्यस्योत्पत्तौ मूलकारणापेक्षस्य प
र्यसिद्धिः परमेश्वर एव कारणमस्तु पेतव्युत्पत्तिसर्वेकास्तु जगत्कारणं। तस्यैव नित्यत्वेन स्वकारण
नपेक्षस्य स्वकृत्सामर्थ्यात्। कल्प्यसामर्थ्यात्तु। जगत्सृष्टौ न प्रतिविधास्यः। न च जगत्सृष्टौ मेवां श्रूयते
किं तु श्रूयते त्वत्र भगवतः परमेश्वरस्यैवात्मैव प्रकृत्यस्य सर्वासां तत्त्वानां प्रवृत्तेः। अपि वा समप्रधा
नानां न नियमवदैकमत्यं दृष्टमिति। यदैकः सिद्धान्तिदैवेरः सांजहार्ष्ठ त्यपर्कपेरणमृष्टिसंहारोभया
नानवाउभयोरपीश्वरत्वाव्याघातादेकस्यतत्तदाधिपत्येतत्तदभिप्रायानुरोधिनां सर्वेषामेकमत्योप

ऽन्नेरदोषः। नन्वागंतुकानां कारणाधीनत्वेनैश्वर्यस्यानवग्रहत्वमात्रविशेषतया मुक्तानां नित्यैश्वर्य
प्राकीनोग्रहत्वात् तेभ्योऽविशेषो यदुक्तिः सर्वेषामधीशत्वमिति परमेश्वरव्यापारस्य सर्गसंहारस्य नेह
तेऽप्यर्वापत्तिरोधान्न शाविरमासां क्वचनिराकरोति। प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमंडलस्थोक्तेः।
यतः परमेश्वराधीनमैश्वर्यं ततस्मान्नैमणिमादिमात्रस्वाराज्यं तत्र लभ्यं गत्वा ह्रूलत्वं कृत्वा
यात्। विकारावर्त्ति च तथाहि स्थितिमाह। एतावानस्य महिमेति विकारवर्त्ति रूपमक्तं भव
ति। यदि ह्रस्वेमलगुणा ब्रह्मण्युपासना। यथा तद्गुणा प्राप्तिस्तथा तद्गुणस्य निरवग्रह
त्वमपि च वस्तुतोऽस्तीति निरवग्रहत्वं च विदुषा प्राप्यमिति तत्र स्वनेन व्यभिचार्यते। यथा
सविकारे ब्रह्मण्युपास्यमाने वस्तुतः स्थितमपि तस्य निर्विकाररूपं न प्राप्यते। तद्वस्य हे
तोऽस्त्वन्तु त्वात् तु पायस्यात्तथा तद्गुणोपासनया वस्तुतः स्थितमपि निरवग्रहत्वं नाप्य
ते। ततोपासनायुरुषत्वाच्च त्वात्। उपासकत्वात् तदक्रतुत्वं निरवग्रहत्वस्योपासनविषयगो
चरत्वात्। विषयाधीनत्वाच्चोपसनायः पुरुषस्वातंत्र्याभावात्। स्वातंत्र्ये वा प्रतिभावत्वम्

प्रसंगादिति।भोगमात्रसाम्यलिंगाच्च।न केवलं स्वाराज्यस्येश्वराधीनतया जगत्सर्गो न वर्णि
नं। साहाय्याद्भोगमात्रेणातेन परमेश्वरेणसाम्याभिधानादपि व्यपदेशाल्लिंगादिति। अन्तव
वतिप्रनयंतिभोजयंतीति। यावत्। सूत्रान्तरावतारणायसंकेते। न त्वेवंसातिशाति
शयत्वादिति। सह परमेश्वरस्यातिशयेन वर्ततइति। विदुषऐश्वर्यस्यसातिशयत्वं त
त्वकार्यं यथालौकिकमैश्वर्यं स्तनेनकार्यत्वादेतद्वत्प्राप्तमिति नयुक्तमानंतेनत
यात्वमित्यर्थः॥ अनावृत्तिः शब्दादनावृत्तिःशब्दात्। किमर्चिरादिमार्गेसाब्रह्मलोकप्रा
प्तानामैश्वर्यस्यांतवत्त्वयासाध्यते। अहो चंद्रालोकादिवब्रह्मलोकादेतल्लोकप्राप्ते
रल्पेरेतद्वत्वंपर्यवसिन्नकल्प्येतिसिद्धसाधनं। उत्तरत्वश्रुतिसिद्धेतिविरोधः। तद्विधा
नां च मर्मुक्तिप्रतिपादनादिति तत्त्वमसिवाक्यार्थोपासनापरास्त्वत्याह। सम्यग्दर्शि
नविध्वस्ततमसामितिद्विविधा। अविद्यातमः निरुपाधिब्रह्मसाक्षात्कारस्तत्त्वेद
र्शनं। तथैवमनिर्वाणंस्वरूपावस्थानलक्षणंकार्यं येनानित्यं स्यादित्याह नित्यसि ६

द्वृति।। ।। इतिश्रीवाचस्पतिमिश्रविरचितेभगवत्पादभाष्यविभागेभामत्यांचतुर्था
ध्यायस्यचतुर्थःपादःसमाप्तः ४ भक्त्यावाह्यसुरेंद्रवंद्यमखिलाधिष्ठोपधा.नातिग
येनान्यायपथोनिषेधेनमयथाब्रह्मामृतंप्राप्यतेसोयंशंकरभाष्यजातविषयोवाच
स्पतेःसादरंसंदमःपरिभाव्यतांसुमतयःस्वार्थेषुकोमत्सरः।।१।। ।अज्ञानसागरं
तीर्त्वाब्रह्मतत्वमभीप्सतां।नीतिर्नौकर्णधारेणमयापारमिनोरथः २।। यन्न्यायकणि
कातत्वसमीक्षातत्वबिंदुभिः।यन्न्यायसांख्ययोगानांवेदंतानांनिबंधनैः ३ समचै
षंमहत्पुण्यंतत्फलंपुष्कलंमया।समर्पितमथैतेनप्रीयतांपरमेश्वरः ४ नृपांतराणां
मनसाप्यगम्यांभ्रूक्षेपमात्रेणचकारकीर्तिं।कार्तस्वरासारसुपूरितार्थःसार्थस्वयं
शास्त्रविचक्षणश्च ५ नरेश्वरायच्चरितानुकारमिच्छंतिकर्तुंनचपारयंति।तस्मिन्म
हीपेमहनीयकीर्तौश्रीमन्नृगेकारिमयानिबंधः।। श्री ।। छ ।। छ ।। छ ।। छ ।।६।। ७

९९/५

99/5

वेदांत वाचस्पति ग्रंथः समाप्तः

इति

चतुर्थाध्यायः

समाप्तः